# অধ্যাত্মরামাযণমাহাত্ম্যম্ ব্রহ্মাণ্ডপুরাণে

{॥ অধ্যাত্মরামাযণমাহাত্ম্যম্ ব্রহ্মাণ্ডপুরাণে ॥}

রামং বিশ্বমযং বন্দে রামং বন্দে রঘূদ্বহম্ ।

রামং বিপ্রবরং বন্দে রামং শ্যামাগ্রজং ভজে ॥

যস্য বাগংশুতশ্চ্যুতং রম্যং রামাযণামৃতম্ ।

শৈলজাসেবিতং বন্দে তং শিবং সোমরূপিণম্ ॥

সচ্চিদানন্দসন্দোহং ভক্তিভূতিবিভূষণম্ ।

পূর্ণানন্দমহং বন্দে সদ্গুরুং শঙ্করং স্বযম্ ॥

অজ্ঞানধ্বান্তসংহর্ত্রী জ্ঞানলোকবিলাসিনী ।

চন্দ্রচূডবচশ্চন্দ্রচন্দ্রিকেযং বিরাজতে ॥

অপ্রমেযত্রযাতীতনির্মলজ্ঞানমূর্তযে ।

মনোগিরাং বিদূরায দক্ষিণামূর্তযে নমঃ ॥ ১॥

সূত উবাচ ।

কদাচিন্নারদো যোগী পরানুগ্রহবাঞ্ছযা ।

পর্যটন্ সকলান্ লোকান্ সত্যলোকমুপাগমত্ ॥ ২॥

তত্র দৃষ্ট্বা মূর্তিমদ্ভিশ্ছন্দোভিঃ পরিবেষ্টিতম্।
বালার্কপ্রভয়া সম্যগ্ভাসয়ন্তং সভাগৃহম্ ॥ ৩॥

মার্কণ্ডেয়াদিমুনিভিঃ স্তূয়মানং মুহুর্মুহুঃ ।
সর্বার্থগোচরজ্ঞানং সরস্বত্যা সমন্বিতম্ ॥ ৪ ॥

চতুর্মুখং জগন্নাথং ভক্তাভীষ্টফলপ্রদম্ ।
প্রণম্য দণ্ডবদ্ভক্ত্যা তুষ্টাব মুনিপুঙ্গবঃ ॥ ৫॥

সন্তুষ্টস্তং মুনিং প্রাহ স্বয়ম্ভূর্বৈষ্ণবোত্তমম্ ।
কিং প্রষ্টুকামস্ত্বমসি তদ্বদিষ্যামি তে মুনে ॥ ৬॥

ইত্যাকর্ণ্য বচস্তস্য মুনির্ব্রহ্মাণমব্রবীত্ ।
ত্বত্তঃ শ্রুতং ময়া সর্বং পূর্বমেব শুভাশুভম্ ॥ ৭॥

ইদানীমেকমেবাস্তি শ্রোতব্যং সুরসত্তম ।
তদ্রহস্যমপি ব্রূহি যদি তেঽনুগ্রহো ময়ি ॥ ৮॥

প্রাপ্তে কলিযুগে ঘোরে নরাঃ পুণ্যবিবর্জিতাঃ ।
দুরাচাররতাঃ সর্বে সত্যবার্তাপরাঙ্মুখাঃ ॥ ৯॥

পরাপবাদনিরতাঃ পরদ্রব্যাভিলাষিণঃ ।

পরস্ত্রীসক্তমনসঃ পরহিংসাপরায়ণাঃ ॥ ১০॥

দেহাত্মদৃষ্টয়ো মূঢা নাস্তিকা পশুবুদ্ধয়ঃ ।

মাতাপিতৃকৃতদ্বেষাঃ স্ত্রীদেবাঃ কামকিঙ্করাঃ ॥ ১১॥

বিপ্রা লোভগ্রহগ্রস্তা বেদবিক্রয়জীবিনঃ ।

ধনার্জনার্থমভ্যস্তবিদ্যা মদবিমোহিতাঃ ॥ ১২॥

ত্যক্তস্বজাতিকর্মাণঃ প্রায়শঃ পরবঞ্চকাঃ।

ক্ষত্রিয়াশ্চ তথা বৈশ্যাঃ স্বধর্মত্যাগশীলিনঃ ॥ ১৩॥

তদ্বচ্ছূদ্রাশ্চ যে কেচিদ্ব্রাহ্মণাচারতৎপরাঃ।

স্ত্রিয়শ্চ প্রায়শো ভ্রষ্টা ভর্ত্রবজ্ঞাননির্ভয়াঃ ॥ ১৪॥

শ্বশুরদ্রোহকারিণ্যো ভবিষ্যন্তি ন সংশয়ঃ।

এতেষাং নষ্টবুদ্ধীনাং পরলোকঃ কথং ভবেত্ ॥ ১৫॥

ইতি চিন্তাকুলং চিত্তং জায়তে মম সন্ততম্ ।

লঘূপায়েন যেনৈষাং পরলোকগতির্ভবেত্।

তমুপায়মুপাখ্যাহি সর্বং বেত্তি যতো ভবান্ ॥ ১৬॥

ইত্যৃষের্বাক্যমাকর্ণ্য প্রত্যুবাচাম্বুজাসনঃ ।

সাধু পৃষ্টং ত্বযা সাধো বক্ষ্যে তচ্ছৃণু সাদরম্ ॥ ১৭॥

পুরা ত্রিপুরহন্তারং পার্বতী ভক্তবৎসলা।

শ্রীরামতত্ত্বং জিজ্ঞাসুঃ পপ্রচ্ছ বিনযান্বিতা ॥ ১৮॥

প্রিযাযৈ গিরিশস্তস্যৈ গূঢং ব্যাখ্যাতবান্ স্বযম্।

পুরাণোত্তমমধ্যাত্মরামাযণমিতি স্মৃতম্ ॥ ১৯॥

তৎপার্বতী জগদ্ধাত্রী পূজযিত্বা দিবানিশম্।

আলোচযন্তী স্বানন্দমগ্না তিষ্ঠতি সাম্প্রতম্ ॥ ২০॥

প্রচরিষ্যতি তল্লোকে প্রাণ্যদৃষ্টবশাদ্যদা ।

তস্যাধ্যযনমাত্রেণ জনা যাস্যন্তি সদ্গতিম্ ॥ ২১॥

তাবদ্দ্বিজৃম্ভতে পাপং ব্রহ্মহত্যাপুরঃসরম্।

যাবজ্জগতি নাধ্যাত্মরামাযণমুদেষ্যতি ॥ ২২॥

তাবৎকলিমহোৎসাহো নিঃশঙ্কং সম্প্রবর্ততে।

যাবজ্জগতি নাধ্যাত্মরামাযণমুদেষ্যতি ॥ ২৩॥

তাবদ্যমভটাঃ শূরাঃ সঞ্চরিষ্যন্তি নির্ভযাঃ।

যাবজ্জগতি নাধ্যাত্মরামাযণমুদেষ্যতি ॥ ২৪॥

তাবৎসর্বাণি শাস্ত্রাণি বিবদন্তে পরস্পরম্ ॥ ২৫॥

তাবৎস্বরূপং রামস্য দুর্বোধং মহতামপি ।

যাবজ্জগতি নাধ্যাত্মরামায়ণমুদেষ্যতি ॥ ২৬॥

অধ্যাত্মরামায়ণসঙ্কীর্তনশ্রবণাদিজম্ ।

ফলং বক্তুং ন শক্নোমি কাৎর্স্ন্যেন মুনিসত্তম ॥ ২৭॥

তথাপি তস্য মাহাত্ম্যং বক্ষ্যে কিঞ্চিত্তবানঘ।

শৃণু চিত্তং সমাধায় শিবেনোক্তং পুরা মম ॥ ২৮॥

অধ্যাত্মরামায়ণতঃ শ্লোকং শ্লোকার্ধমেব বা।

যঃ পঠেত্ ভক্তিসংযুক্তঃ স পাপান্মুচ্যতে ক্ষণাত্ ॥ ২৯॥

যস্তু প্রত্যহমধ্যাত্মরামায়ণমনন্যধীঃ।

যথাশক্তি বদেদ্ভক্ত্যা স জীবন্মুক্ত উচ্যতে ॥ ৩০॥

যো ভক্ত্যার্চযতেঽধ্যাত্মরামায়ণমতন্দ্রিতঃ।

দিনে দিনেঽশ্বমেধস্য ফলং তস্য ভবেন্মুনে ॥ ৩১॥

যদৃচ্ছযাপি যোঽধ্যাত্মরামায়ণমনাদরাত্।

অন্যতঃ শৃণুযান্মর্ত্যঃ সোঽপি মুচ্যেত পাতকাত্ ॥ ৩২॥

নমস্করোতি যোঽধ্যাত্মরামায়ণমদূরতঃ।

সর্বদেবার্চনফলং স প্রাপ্নোতি ন সংশয়ঃ ॥ ৩৩॥

লিখিত্বা পুস্তকেঽধ্যাত্মরামায়ণমশেষতঃ।

যো দদ্যাদ্রামভক্তেভ্যস্তস্য পুণ্যফলং শৃণু ॥ ৩৪ ॥

অধীতেষু চ বেদেষু শাস্ত্রেষু ব্যাকৃতেষু চ ।

যৎফলং দুর্লভং লোকে তৎফলং তস্য সম্ভবেত্ ॥ ৩৫ ॥

একাদশীদিনেঽধ্যাত্মরামায়ণমুপোষিতঃ ।

যো রামভক্তঃ সদসি ব্যাকরোতি নরোত্তমঃ ॥ ৩৬॥

তস্য পুণ্যফলং বক্ষ্যে শৃণু বৈষ্ণবসত্তম ।

প্রত্যক্ষরং তু গায়ত্রীপুরশ্চর্যাফলং ভবেত্ ॥ ৩৭॥

উপবাসব্রতং কৃত্বা শ্রীরামনবমীদিনে ।

রাত্রৌ জাগরিতোঽধ্যাত্মরামায়ণমনন্যধীঃ।

যঃ পঠেচ্ছৃণুয়াদ্বাপি তস্য পুণ্যং বদাম্যহম্ ॥ ৩৮॥

কুরুক্ষেত্রাদিনিখিলপুণ্যতীর্থেষ্বনেকশঃ।

আত্মতুল্যং ধনং সূর্যগ্রহণে সর্বতোমুখে ॥ ৩৯॥

বিপ্রেভ্যো ব্যাসতুল্যেভ্যো দত্ত্বা যৎফলমশ্নুতে।

তৎফলং সম্ভবেত্তস্য সত্যং সত্যং ন সংশয়ঃ ॥ ৪০॥

যো গায়তে মুদাঽধ্যাত্মরামায়ণমহর্নিশম্।

আজ্ঞাং তস্য প্রতীক্ষন্তে দেবা ইন্দ্রপুরোগমাঃ ॥ ৪১॥

পঠন্ প্রত্যহমধ্যাত্মরামায়ণমনুব্রতঃ।

যদ্যৎকরোতি তৎকর্ম ততঃ কোটিগুণং ভবেত্ ॥ ৪২॥

তত্র শ্রীরামহৃদয়ং যঃ পঠেত্ সুসমাহিতঃ ।

স ব্রহ্মঘ্নোঽপি পূতাত্মা ত্রিভিরেব দিনৈর্ভবেত্ ॥ ৪৩॥

শ্রীরামহৃদয়ং যস্তু হনূমৎপ্রতিমান্তিকে।

ত্রিঃ পঠেত্ প্রত্যহং মৌনী স সর্বেপ্সিতভাগ্ভবেত্ ॥ ৪৪॥

পঠন্ শ্রীরামহৃদয়ং তুলস্যশ্বত্থয়োর্যদি।

প্রত্যক্ষরং প্রকুর্বীত ব্রহ্মহত্যানিবর্তনম্ ॥ ৪৫॥

শ্রীরামগীতামাহাত্ম্যং কৃৎস্নং জানাতি শঙ্করঃ।

তদর্ধং গিরিজা বেত্তি তদর্ধং বেদ্ম্যহং মুনে ॥ ৪৬॥

তত্তে কিঞ্চিৎপ্রবক্ষ্যামি কৃৎস্নং বক্তুং ন শক্যতে ।

যজ্জ্ঞাত্বা তৎক্ষণাল্লোকশ্চিত্তশুদ্ধিমবাপ্নুযাত্ ॥ ৪৭॥

শ্রীরামগীতা যৎপাপং ন নাশযতি নারদ।

তন্ন নশ্যতি তীর্থাদৌ লোকে ক্বাপি কদাচন।

তন্ন পশ্যাম্যহং লোকে মার্গমাণোঽপি সর্বদা ॥ ৪৮॥

রামেণোপনিষৎসিন্ধুমুন্মথ্যোৎপাদিতং মুদা।

লক্ষ্মণাযার্পিতাং গীতাসুধাং পীত্বাঽমরো ভবেত্ ॥ ৪৯॥

জমদগ্নিসুতঃ পুর্বং কার্তবীর্যবধেচ্ছযা।

ধনুর্বিদ্যামভ্যসিতুং মহেশস্যান্তিকে বসন্ ॥ ৫০॥

অধীযমানাং পার্বত্যা রামগীতাং প্রযত্নতঃ ।

শ্রুত্বা গৃহীত্বাঽঽশু পঠন্নারাযণকলামগাত্ ॥ ৫১॥

ব্রহ্মহত্যাদিপাপানাং নিষ্কৃতিং যদি বাঞ্ছতি।

রামগীতাং মাসমাত্রং পঠিত্বা মুচ্যতে নরঃ ॥ ৫২॥

দুষ্প্;রতিগ্রহদুর্ভোজ্যদুরালাপাদিসম্ভবম্।

পাপং যত্তৎকীর্তনেন রামগীতা বিনাশযেত্ ॥ ৫৩॥

শালগ্রামশিলাগ্রে চ তুলস্যশ্বত্থসন্নিধৌ।

**_Stotram Digitalized By Sanskritdocuments.org_**

যতীনাং পুরতস্তদ্বত্ রামগীতাং পঠেত্তু যঃ ॥ ৫৪॥

স তৎফলমবাপ্নোতি যদ্বাচোঽপি ন গোচরম্ ॥ ৫৫॥

রামগীতাং পঠন্ ভক্ত্যা যঃ শ্রাদ্ধে ভোজযেদ্দ্বিজান্।

তস্য তে পিতরঃ সর্বে যান্তি বিষ্ণোঃ পরং পদম্ ॥ ৫৬॥

একাদশ্যাং নিরাহারো নিযতো দ্বাদশীদিনে।

স্থিত্বাগস্ত্যতরোর্মূলে রামগীতাং পঠেত্তু যঃ।

স এব রাঘবঃ সাক্ষাত্ সর্বদেবৈশ্চ পূজ্যতে ॥ ৫৭॥

বিনা দানাং বিনা ধ্যানং বিনা তীর্থাবগাহনম্ ।

বহুনা কিমিহোক্তেন শৃণু নারদ তত্ত্বতঃ।

রামগীতাং নরোঽধীত্য তদনন্তফলং লভেত্ ॥ ৫৮॥

শ্রুতিস্মৃতিপুরাণেতিহাসাগমশতানি চ।

অর্হন্তি নাল্পমধ্যাত্মরামাযণকলামপি ॥ ৫৯॥

অধ্যাত্মরামচরিতস্য মুনীশ্বরায

মাহাত্ম্যমেতদুদিতং কমলাসনেন ।

যঃ শ্রদ্ধযা পঠতি বা শৃণুযাত্ স মর্ত্যঃ

প্রাপ্নোতি বিষ্ণুপদবীং সুরপূজ্যমানঃ ॥ ৬০॥

ইতি শ্রীব্রহ্মাণ্ডপুরাণে উত্তরখণ্ডে অধ্যাত্মরামায়ণমাহাত্ম্যং সম্পূর্ণম্ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Adhyatma Ramayana Mahatmyam Lyrics in Bengali PDF
% File name : adhyAtmarAmAyaNamAhAtmyam.itx
% Category : adhyAtmarAmAyaNa
% Location : doc_raama
% Author : Shri Veda Vyas
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : PSA Easwaran psaeaswaran at gmail.com
% Proofread by : PSA Easwaran psaeaswaran at gmail.com
% Description-comments : shrIbrahmANDapurANe uttarakhaNDe
% Latest update : June 8, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website